त्यभिधीयते ॥ ३९ ॥ तथातद्वृत्तिसंबन्धात्प्रमाणमिति कथ्यते । अज्ञातमपि चैतन्यं प्रमेयमिति कथ्यते ॥ ४० ॥ तथा ज्ञातं च चैतन्यं फलमित्यभिधीयते । सर्वोपाधिविनिर्मुक्तं स्वात्मानं भावयेत्सुधीः ॥ ४१ ॥ एवं यो वेद तत्त्वेन ब्रह्मभूयाय कल्पते । सर्ववेदान्तसिद्धान्तसारं वच्मि यथार्थतः ॥४२॥ स्वयं मृत्वा स्वयं भूत्वा स्वयमेवावशिष्यते ॥ इत्युपनिषत् ॥ हरिः ॐ तत्सत् ॥

ॐ स ह नाववत्विति शान्तिः ॥

इति कठरुद्रोपनिषत्समाप्ता ॥ ८६ ॥

भावनोपनिषत् ॥ ८७ ॥

स्वाविद्यापदतत्कार्यं श्रीचक्रोपरि भासुरम् ।
बिन्दुरूपशिवाकारं रामचन्द्रपदं भजे ॥ १ ॥

ॐ भद्रं कर्णेभिरिति शान्तिः ॥

हरिः ॐ ॥ आत्मानमखण्डमण्डलाकारमावृत्य सकलब्रह्माण्डमण्डलं स्वप्रकाशं ध्यायेत् । ॐ श्रीगुरुः सर्वकारणभूता शक्तिः । तेन नवरन्ध्ररूपो देहः । नवशक्तिरूपं श्रीचक्रम् । वाराही पितृरूपा । कुरुकुल्ला बलिदेवता माता । पुरुषार्थाः सागराः । देहो नवरत्नद्वीपः । आधारनवकमुद्राः शक्तयः । त्वगादिसप्तधातुभिरनेकैः संयुक्ताः संकल्पाः कल्पतरवः । तेजः कल्पकोद्यानम् । रसनया भाव्यमाना मधुराम्लतिक्तकटुकषायलवणभेदाः षड्रसाः षड्ऋतवः क्रियाशक्तिः पीठम् । कुण्डलिनी ज्ञानशक्तिर्गृहम् । इच्छाशक्तिर्महात्रिपुरसुन्दरी । ज्ञाता होता ज्ञानमग्निः ज्ञेयं हविः । ज्ञातृज्ञानज्ञेयानामभेदभावनं श्रीचक्रपूजनम् । नियतिसहिताः शृङ्गारादयो नव रसा अणिमादयः । कामक्रोधलोभमोहमदमात्सर्यपुण्यपापमया बाह्याद्यष्ट शक्तयः । पृथिव्यप्तेजोवाय्वाकाशश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थमनोविकाराः षोडश शक्तयः । वचनादानगमनविसर्गानन्दहानोपेक्षाबुद्धयोऽनङ्गकुसुमादिशक्तयोऽष्टौ । अलम्बुसा कुहूर्विश्वोदरी वरुणा हस्तिजिह्वा यशस्वत्यश्विनी गान्धारी पूषा शङ्खिनी सरस्वतीडा पिङ्गला सुषुम्ना चेति चतुर्दश नाड्यः । सर्वसंक्षोभिण्यादिचतुर्दशारगा देवताः । प्राणापानव्यानोदानसमाननागकूर्मकृकरदेवदत्तधनंजया इति दश वायवः । सर्वसिद्धिप्रदा देव्यो बहिर्दशारगा

---

१ परमकारण. २ शक्तिमयं. ३ मेरुदण्डा. ४ धातुरोमसंयुक्ताः. ५ पयस्विनी.

देवताः । एतद्वायुदशकसंसर्गोपाधिभेदेन रेचकपूरकशोषकदाहप्लावका अमृतमिति प्राणमुख्यत्वेन पञ्चविधोऽस्ति । क्षारको दारकः क्षोभको मोहको जृम्भक इत्यपालनमुख्यत्वेन पञ्चविधोऽस्ति । तेन मनुष्याणां मोहको दाहको भक्ष्यभोज्यलेह्यचोष्यपेयात्मकं चतुर्विधमन्नं पाचयति । एता दश वह्निकलाः सर्वज्ञत्वाद्यन्तर्दशारगा देवताः । शीतोष्णसुखदुःखेच्छासत्त्वरजस्तमोगुणा वशिन्यादिशक्तयोऽष्टौ । शब्दस्पर्शरूपरसगन्धाः पञ्चतन्मात्राः पञ्च पुष्पबाणा मन इक्षुधनुः । वश्यो बाणो रागः पाशः । द्वेषोऽङ्कुशः । अव्यक्तमहत्तत्त्वमहदहंकार इति कामेश्वरी-वज्रेश्वरी-भगमालिन्योऽन्तस्त्रिकोणाग्रगा देवताः । पञ्चदशतिथिरूपेण कालस्य परिणामावलोकनस्थितिः पञ्चदश नित्याः । श्रद्धानुरूपा धीर्देवता । तयोः कामेश्वरी सदानन्दघना परिपूर्णस्वात्मैक्यरूपा देवता । सलिलमिति लौहित्यकारणं सत्त्वम् । कर्तव्यमकर्तव्यमिति भावनायुक्त उपचारः । अस्तिनास्तीति कर्तव्यतानूपचारः । बाह्याभ्यन्तःकरणानां रूपग्रहणयोग्यतास्त्वत्यावाहनम् । तस्य बाह्याभ्यन्तःकरणानामेकरूपविषयग्रहणमासनम् । रक्तशुक्लपदैकीकरणं पाद्यम् । उज्ज्वलदामोदानन्दासनदानमर्घ्यम् । स्वच्छं स्वतःसिद्धमित्याचमनीयम् । चिच्चन्द्रमयीति सर्वाङ्गस्नपनं स्नानम् । चिदग्निस्वरूपपरमानन्दशक्तिस्फुरणं वस्त्रम् । प्रत्येकं सप्तविंशतिधा भिन्नत्वेनेच्छाज्ञानक्रियात्मकब्रह्मग्रन्थिमद्रसतन्तुब्रह्मनाडी ब्रह्मसूत्रम् । स्वव्यतिरिक्तवस्तुसङ्गरहितस्मरणं विभूषणम् । सच्चित्सुखपरिपूर्णतास्मरणं गन्धः । समस्तविषयाणां मनसः स्थैर्येणानुसंधानं कुसुमम् । तेषामेव सर्वदा स्वीकरणं धूपः । पवनावच्छिन्नोर्ध्वज्वलनसच्चिदुल्काकाशदेहो दीपः । समस्तयातायातवर्ज्यं नैवेद्यम् । अवस्थात्रयाणामेकीकरणं ताम्बूलम् । मूलाधारादा ब्रह्मरन्ध्रपर्यन्तं ब्रह्मरंध्रादा मूलाधारपर्यन्तं गतागतरूपेण प्रादक्षिण्यम् । तुर्यावस्था नमस्कारः । देहशून्यप्रमातृतानिमज्जनं बलिहरणम् । सत्यमस्ति कर्तव्यमकर्तव्यमौदासीन्यनित्यात्मविलापनं होमः । स्वयं तत्पादुकानिमज्जनं परिपूर्णध्यानम् । एवं मुहूर्तत्रयं भावनापरो जीवन्मुक्तो भवति । तस्य

---

१ पाचकशोषक. २ यो जाठरोऽग्निर्भवति. ३ मुख्यवर्णाः. ४ सौहित्यकरणं. ५ ग्रहणं स्थिरासनं. ६ सदानन्द. ७ स्मरणम्. ८ स्वच्छं स्वपरिपूतता(रणा)नुस्मरणं, सत्सङ्गपरिपूतता. ९ द्वैतविसर्जनं. १० सत्त्वमस्ति. ११ मुहूर्तद्वयं घटिकामात्रं. १२ नया युक्तो.

देवतात्मैक्यसिद्धिः[1]। चिन्तितकार्याण्ययत्नेन[2] सिद्ध्यन्ति। स एव शिवयोगीति कथ्यते[3]। कादिहादिमतोक्तेन भावना प्रतिपादिता। जीवन्मुक्तो भवति[4] य एवं वेद। इत्युपनिषत्॥ हरिः ॐ तत्सत्॥

ॐ भद्रं कर्णेभिरिति शान्तिः॥

इत्याथर्वणीया भावनोपनिषत्संपूर्णा॥ ८७॥

रुद्रहृदयोपनिषत्॥ ८८॥

यद्ब्रह्म रुद्रहृदयमहाविद्याप्रकाशितम्।
तद्ब्रह्ममात्रावस्थानपदवीमधुना भजे॥ १॥

ॐ स ह नाववत्विति शान्तिः॥

हरिः ॐ॥ हृदयं कुण्डली भस्मरुद्राक्षगणदर्शनम्। तारसारं महावाक्यं पञ्चब्रह्माग्निहोत्रकम्॥ १॥ प्रणम्य शिरसा पादौ शुको व्यासमुवाच ह। को देवः सर्वदेवेषु[4] कस्मिन्देवाश्च सर्वशः॥ २॥ कस्य शुश्रूषणान्नित्यं प्रीता देवा भवन्ति मे। तस्य तद्वचनं श्रुत्वा प्रत्युवाच पिता शुकम्॥ ३॥ सर्वदेवात्मको रुद्रः सर्वे देवाः शिवात्मकाः। रुद्रस्य दक्षिणे पार्श्वे रविर्ब्रह्मा त्रयोऽग्नयः॥ ४॥ वामपार्श्वे उमा देवी विष्णुः सोमोऽपि ते त्रयः। या उमा सा स्वयं विष्णुर्यो विष्णुः स हि चन्द्रमाः॥ ५॥ ये नमस्यन्ति गोविन्दं ते नमस्यन्ति शंकरम्। येऽर्चयन्ति हरिं भक्त्या तेऽर्चयन्ति वृषध्वजम्॥ ६॥ ये द्विषन्ति विरूपाक्षं ते द्विषन्ति जनार्दनम्। ये रुद्रं नाभिजानन्ति ते न जानन्ति केशवम्॥ ७॥ रुद्रात्प्रवर्तते बीजं बीजयोनिर्जनार्दनः। यो रुद्रः स स्वयं ब्रह्मा यो ब्रह्मा स हुताशनः॥ ८॥ ब्रह्मविष्णुमयो रुद्र अग्नीषोमात्मकं जगत्। पुंलिङ्गं सर्वमीशानं स्त्रीलिङ्गं भगवत्युमा॥ ९॥ उमारुद्रात्मिकाः सर्वाः प्रजाः स्थावरजङ्गमाः। व्यक्तं सर्वमुमारूपमव्यक्तं तु महेश्वरम्॥ १०॥ उमाशंकरयोगो यः स योगो विष्णुरुच्यते। यस्तु तस्मै नमस्कारं कुर्याद्भक्तिसमन्वितः॥ ११॥ आत्मानं परमात्मानमन्तरात्मानमेव च। ज्ञात्वा त्रिविधमात्मानं परमात्मानमाश्रयेत्॥ १२॥ अन्तरात्मा भवेद्ब्रह्मा परमात्मा महेश्वरः। सर्वेषामेव भूतानां विष्णुरात्मा सनातनः॥ १३॥ अस्य त्रैलोक्यवृक्षस्य भूमौ विटपशाखिनः। अग्रं मध्यं तथा मूलं विष्णुब्रह्ममहेश्वराः

---

१ क्यं च सिध्यति. २ णि नैजेन. ३ निगद्यते. ४ वेदेषु.